# विश्वभाषा संस्कृतम् - विद्वान् .एन्. टि. श्रीनिवास अय्यङ्गार्यः

**सन्दर्शकः - विद्वान् टि. एन्. प्रभाकरः**



**सन्दर्शकः** – मान्यवराः पण्डितराजाः, भूयांसः प्रणामाः ।

संस्कृतभाषायाः प्राचीनाध्ययनपारम्परिकाध्ययन– वर्तमानाध्ययनविषये भवदीयः अभिप्रायः प्रकाश्यते वा ?

**एन्.टि.एस्.** – अहो ! प्राचीनपारम्परिकाध्ययन–स्मरणमात्रेण एव शरीरे रोमाञ्चः सञ्जायते । मुखस्था विद्या इत्युक्तिं सोदाहरणं समर्थयन्तः शतशः आचार्याः तदा आसन्निति श्रुतमस्माभिः । अध्यापनग्रन्थभागास्सर्वे तेषां जिह्वाग्रे एव अतिष्ठन् । छात्राः केवलं हस्तैः ग्रन्थान् गृहीत्वा उपविशन्ति स्म । संस्कृतवाङ्मयस्य शास्त्राध्ययनं काव्याध्ययनं च करणीयमित्येकमेव लक्ष्यं छात्राणामभूत् । परमधुना ते संस्कृतशास्त्र–काव्येतरविषयानपि अधीयानास्सन्ति । एतेन गाम्भीर्यं तलस्पर्शर्यध्ययनं खिलदस्ति । एतैस्साकं बाह्यप्रपञ्चसौन्दर्याणि रमणीयचित्ताकर्षकदृश्यानि अधिकानि किल सन्ति । एतानि यस्य कस्यापि युवच्छात्रस्य चित्तं झटिति समाकर्षन्ति वर्तन्ते ।

पुरा शलाकापरीक्षाशुग्रन्थरचनादिपरीक्षाः भूरि आसन् । तादृशीषु परीक्षासु सम्यग्लेखन–सामर्थ्यमपि छात्राणामासीत् । मन्दिरेषु देवतारथोत्सवकाले वेदविद्वांसः मिथः एकैकस्य हस्तं गृहीत्वा वेदपारायणं कुर्वन्तः गच्छन्ति स्म । मन्त्रघोषसमये यस्मिन् कस्मिन्नपि मन्त्रे स्वरव्यत्यासः येन क्रियते स्म, तदा तस्य विदुषः करम् इतरे वैदिकाः

त्यजन्ति स्म । अपस्वरघोषकः विद्वान् बहिरेव गच्छेदिति नियमः अवर्तत । ते हि नो दिवसा गताः । अधुना कानिचन मठमन्दिराणि आर्थिकदृष्ट्या पुरोगामीनि विद्यन्ते । एकैकोऽपि मठः एकैकं शास्त्रं दत्तकरूपेण स्वीकुर्यात् । सर्वासु भाषासु स्थितानां ताडग्रन्थानां सङ्ग्रहः भवेत् । प्रकटितानां सान्द्रमुद्रिकानां (C.D.) सङ्ग्रहोऽपि भवेत् । तच्छास्त्रविषये इदमित्थम् इति निष्कृष्टं व्याख्यानं कुर्वतः द्वित्रान् विदुषः निर्माय तेभ्यः विश्वविद्यालयप्राध्यापकानां वेतनेभ्यः इतरानुकूल्येभ्यश्च अपि भूरि सर्वविधसौलभ्यानि प्रकल्प्य ते नितरां पोषणीयाः ।

**सन्दर्शकः** – इदानीन्तनदशकेषु संस्कृत–सम्भाषणान्दोलनं जनप्रियतां प्राप्नुवत् अस्ति । एतद्विषयमधिकृत्य भवद्भिः किञ्चिदुच्यते वा?

**एन्.टि.एस्.** – एषः अत्यपेक्षितः सामयिकः स्तुत्यर्हः प्रयत्नः । भाष्यते इति भाषा इति भाषापदव्याख्यानमस्ति । संस्कृतसम्भाषणेषु भाषाप्रावीण्यं सम्पादयितुम् इच्छुकाः जनाः वाल्मीकिरामायणं, व्यासमहाभारतं, पञ्चतन्त्रं, हितोपदेशं, संस्कृतनाटकानां संवादाञ्श्च अवश्यं पठेयुः । छात्रेभ्यः संस्कृतव्याख्यानद्वारैव संस्कृतकाव्यानां परिचयः कारणीयः । सर्वेषु सन्दर्भेषु संस्कृतमेव उपयुज्यते इति तु न साधु । परं विविधवेदिकासु अनेकेषु सन्दर्भेषु सामान्य–जनानां कर्णपथं संस्कृतसम्भाषणं नेतव्यमिति तु कालगतिः किल !

संस्कृतकलाशालासु काव्यसाहित्य–कक्ष्यापर्यन्तं उभयोः भाषयोः पाठनं स्यात् । विद्वत्कक्ष्यासु तु संस्कृतमेव बोधनमाध्यमं, लेखनमाध्यमं च स्यात् । संस्कृतमन्तरा भाषान्तरमाश्रियते चेत् कथं वा तत्र संस्कृतवैदुष्यं सेत्स्यति ?

**सन्दर्शकः** – संस्कृतज्ञानं संस्कृतविदुषां केवलं सीमितं वा ?

**एन्.टि.एस्.** – सर्वथा न । भारतदेशस्य यस्याः कस्याः अपि भाषायाः शिक्षकस्य संस्कृतभाषायाः प्राथमिकपरिचयः भवेदेव । विद्यमानानां केषाञ्चन काव्यानां रससमयान्, केषाञ्चन शास्त्राणां लौकिकन्यायांश्च अन्यभाषाकोविदाः जानीयुः । एवमेव भौतशास्त्रज्ञः न्यायशास्त्रं, भाषाशास्त्रवित् पाणिनेः शास्त्रज्ञानं , मनश्शास्त्रज्ञः योगशास्त्रं, गणितकोविदः आर्यभटभास्कराद्याचार्यैरुपदिष्टं ज्योतिश्शास्त्रज्ञानं, राज्यशास्त्र–समाजशास्त्रज्ञाः रामायणस्य

कञ्चित्सर्गं भीष्मोपदेशं च अवश्यमवगच्छेयुः । न्यायशास्त्रपदवीधराः स्मृतिग्रन्थान् जानीयुः । किं बहुना, भारतजातः सर्वोऽपि संस्कृतभाषायाः प्राथमिकज्ञानं प्राप्नुयात् ।

**सन्दर्शकः** – संस्कृतज्ञस्य दिनचर्या कथं भवेत् ?

**एन्.टि.एस्.** – प्रातः ब्राह्मीमुहूर्ते चतुर्वादन एव उत्तिष्ठेत् । सरलशारीरकव्यायामाः कर्तव्याः तेन । ध्यातव्यः हृदिस्थः चेतनः । त्रिहोरावधि अध्ययनं कुर्यात् । प्रकृतेऽरपि ज्ञानसम्पादनं कुर्यात् । पूर्वसूरिणामनुभवान् अभ्यासाञ्श्च आत्मसात्कुर्यात् । छात्रदशातः एव कनीयछात्रान् अध्यापयेत् । विश्वकुटुम्बचिन्तनं भवेत् । शैक्षणिकज्ञानार्थम् अन्यत्र गमनं स्यात् । इतरभाषाकवीनां परिचयः, तौलनिकाध्ययनं, परोपकारिता, सरलजीवनम् उदात्तचिन्तनमित्यादिकं भवेयुः ।

**सन्दर्शकः** – कन्नड–संस्कृतभाषयोस्सम्बन्धः कीदृशः ?

**एन्.टि.एस्.** – प्राचीनकालादपि कन्नडसंस्कृत–भाषासम्बन्धः समागच्छन्नेवास्ति । भाषाः मिथः सम्बन्धमलभन्त एव । जन्य–जनकभावसम्बन्धः, पोष्यपोषकभावसम्बन्धः इति विदग्धाः कथयन्ति । कन्नडभाषासाहित्यम् इतोऽप्यतिशयं यदि समभिवर्धेत तर्हि तस्यावश्यकं तु संस्कृतभाषा–सम्बन्ध एव । न केवलं कन्नडप्राचीनाः पम्प–रन्न–लक्ष्मीश–कुमारव्यासादिकवयः, अपि तु इदानीन्तनसमकालीनाः राष्ट्रकविः कुवेम्पु, डा । द. रा. बेन्द्रे, पु. ति. न, डि. वि. जि. प्रभृतयः कवयोऽपि कन्नड–संस्कृतभाषयोरुभयोरपि सव्यसाचिनः कवयः अभूवन् । अत एव तैः उत्तमसाहित्यं परिसृष्टमभवत् । पुरा कन्नड एम्. ए. छात्रैः २०० अङ्कयुतस्य संस्कृतभाषापत्रद्वयस्य कृते संस्कृतं पठनीयमासीत् । परमधुना तस्याः व्यवस्थायाः भङ्गः जातः । संस्कृतभाषा–पत्रपरित्यागकारणेनैव कन्नड एम्. ए. पदवीधराः अतीव बलहीनास्सन्तीति मदीया भावना ।

**सन्दर्शकः** – संस्कृतविश्वविद्यालयस्थापनाय कैश्चित् विरोधः प्रकटितः खलु?

**एन्.टि.एस्.** – विरोधः भारते, कर्णाटकात् ऋते अन्यत्र इतरदेशेषु कथं साध्यः ? (हासः) संस्कृतं कयाचित् निर्दिष्टजात्या सह यदा सम्बद्धम् इति विपरीतभावना जाता, तदैव ईदृशः विरोधः प्रवृत्तः । ऋग्वेदः प्रथमवारं पुस्तकरूपेण विदेशे प्रकटितः । जर्मन् देशस्य आकाशवाण्या

सर्वप्रथमं नभस्तः संस्कृतवार्ता सम्प्रसारिता । विश्वसंस्कृत–सम्मेलनानि प्रचालयितुम् अधुनापि अनेके विदेशाः अहमहमिकया पादाग्रे तिष्ठन्तस्सन्ति । किन्तु अस्मदीये राज्ये अज्ञानमेवार्हतां लब्ध्वा केचन वितण्डवादिनः स्वीयं बौद्धिकं दास्यं प्रकटयितुम् ईदृशं विरोधं कुर्वाणाः वर्तन्ते । प्रचारप्रसार–माध्यमद्वारा मूल्यरहितप्रचार एव तेषां मुख्यं प्रयोजनमस्ति । पूर्वाग्रहरहितं चिन्तनं मानसिक–दृढतां च इतःपरमपि तैः करणीयमिति तु अद्यतनकालीनमाह्वानमस्ति । अधुना वयं विश्वस्य प्रजाः इति मत्वा तदनुरूपं चिन्तनं व्यवहारं च अभ्यस्य देशगौरवं रक्षेम । तादृशशुभदिवसाः समागच्छन्त्विति अहमाशासे ।

**सन्दर्शकः** – जागतिकस्तरे संस्कृतविश्वविद्यालयः कथं कार्यं निर्वहेत् ?

**एन्.टि.एस्.** – संस्कृतविश्वविद्यालयः इतरविश्वविद्यालयानां संस्कृतविभागैः, संस्कृत–विद्यापीठैः, महापाठशालाभिः, प्राच्यविद्या–संशोधनालयैः, हस्तप्रतिभण्डारैः, राष्ट्रिय–हस्तप्रतिसंस्थाभिः, पुरातत्त्वशास्त्रवेदिकाभिः, संस्कृतप्रचारसंस्थाभिः, स्थानीयभाषापरिषद्भिः च सह सम्पर्कं सहयोगं च कुर्यात् । अध्ययनानि, संशोधनानि पुस्तकप्रकटनानि च प्रचलेयुः । इङ्ग्लेण्ड्देशे यथा षेक्स्पियर् ग्रामः अस्ति, तथा अत्रापि भारते वाल्मीकिग्रामः कालिदासग्रामः च भवेत् । वर्तमानकालीनसंस्कृतकविभ्यः विद्वद्भ्यश्च प्रोत्साहनं प्रदेयम् ।

**सन्दर्शकः** – भूयांसि नमांसि ।